# Shri Ganesha Stuti Vamadevakrita

# વામદેવકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Vamadevakrita

File name : gaNeshastutiHvAmadevakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 11 | 4.11. 54-67||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# વામદેવકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
વામદેવ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં સદા સ્વાનન્દવાસિને ।
સિદ્ધિબુદ્ધિપતે તુભ્યં વિઘ્નેશાય નમો નમઃ ॥ ૫૪॥
મૂષકારૂઢ હેરમ્બ ભક્તવાઞ્છાપ્રપૂરક ।
ઢુણ્ઢિરાજાય તે દેવ રક્ષ માં તે નમો નમઃ ॥ ૫૫॥
આદિમધ્યાન્તહીનાય લમ્બોદર નમોઽસ્તુ તે ।
આદિમધ્યાન્તરૂપાય શઙ્કરપ્રિયસૂનવે ॥ ૫૬॥
નાનામાયાધરાયૈવ માયિભ્યો મોહદાયિને ।
માયામાયિકભેદૈસ્ત્વં ક્રીડસે તે નમો નમઃ ॥ ૫૭॥
વિષ્ણુપુત્રાય શેષસ્ય પુત્રાય બ્રાહ્મણાય તે ।
બ્રહ્મપુત્રાય સર્વેશ સર્વપુત્રાય તે નમઃ ॥ ૫૮॥
સર્વેષાં ચૈવ પિત્રે તે માત્રે સર્વાત્મકાય તે ।
મહોદરાય દેવેન્દ્રપાય જ્યેષ્ઠાય વૈ નમઃ ॥ ૫૯॥
મહોગ્રાય મહેશાય વિષ્ણવે પ્રભવિષ્ણવે ।
અમૃતાય તુ સૂર્યાય નાનાશક્તિસ્વરૂપિણે ॥ ૬૦॥
પુરુષાય પ્રકૃતયે ગુણેશાય ગુણાત્મને ।
એકાનેકાત્મકાયૈવ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૬૧॥
ભક્તેભ્યઃ સર્વદાત્રે તે બ્રહ્મણાં પતયે નમઃ ।
યોગાય યોગનાથાય યોગિનાં પતયે નમઃ ॥ ૬૨॥
સ્તૌમિ કિં ત્વાં ગણેશાન મનોવાણીવિહીનકમ્ ।
મનોવાણીમયં નૈવાતસ્તે દેવ નમોઽસ્તુ તે ॥ ૬૩॥
સહસૈવં સંસ્તુવતસ્તસ્ય ભક્તિરસેન ચ ।
રોમોદ્ગમઃ પ્રાદુરાસીત્ કણ્ઠરોધો બભૂવ હ ॥ ૬૪॥
ઉવાચ વામદેવં સ નૃત્યન્તં વિઘ્નનાયકઃ ।

વરં વૃણુ મહાભાગ યત્તે ચિત્તે સ્થિતં પરમ્ ॥ ૬૫॥
(ફલશ્રુતિઃ)
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં પરમ્ ।
શ઼ૃણોતિ યઃ પઠતિ ચેત્તસ્મૈ યોગપ્રદં તથા ॥ ૬૬॥
ભક્તિદં ભક્તિયુક્તેભ્યઃ પુત્રપૌત્રાદિકપ્રદમ્ ।
ધનધાન્યપ્રદં પ્રોક્તં મયિ પ્રીતિવિવર્ધનમ્ ॥ ૬૭॥

ઇતિ વામદેવકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૧૧ । ૪.૧૧। ૫૪-૬૭॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 11 . 4.11. 54-67..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stuti Vamadevakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*